National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(65): 222-225
© 2026 NJHSR
www.sanskritarticle.com

**सुभाष-वैद्यः**
अनुसन्धाता, व्याकरणविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**सुभाष-वैद्यः**
अनुसन्धाता, व्याकरणविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# वैयाकरणसिद्धान्तकौमुद्याः स्त्रीप्रत्ययान्तानां नवीनोदाहरणानि

**सुभाष-वैद्यः**

**शोधसारः—**
वैयाकरणसिद्धान्तकौमुद्याः स्त्रीप्रत्ययान्तानां नवीनोदाहरणानि इत्यस्मिन् प्रबन्धे पाणिनीयव्याकरणे स्त्रीत्ववाचकप्रत्ययानां टाप्, डाप्, चाप्, ङीप्, ङीष्, ङीन्, ऊङ्, ति इत्यादीनां प्रयोगविचारः सूक्ष्मतः सम्पन्नमस्ति। चतुर्थाध्यायस्य स्त्रियामधिकारान्तर्गतं पाणिनेः सूत्रसंकुलं (४.१.३–४.१.८१) आधारीकृत्य, सिद्धान्तकौमुदीटीकायाम् उल्लिखितानां सूत्राणां विश्लेषणपूर्वकं यथासम्भवम् नवीनोदाहरणानां सन्निवेशः अस्मिनालेखे निष्पादितः। स्त्रीप्रत्ययस्य लिङ्गनिर्णयकत्वं केवलं शास्त्रीयव्यवस्थां न दर्शयति, अपि तु लौकिकप्रयोगेषु अपि तदुपयोगित्वम् अनुभाव्यते। अत्र विशेषतया टाप्-डाप्-ङीप्-ङीष् प्रत्ययानां नवप्रसंगेषु सन्दर्भविन्यासः प्रस्तुतः, यथा— वयसि प्रथमे (४.१.२०), द्विगोः (४.१.२१), डाबुभ्यामन्यतरस्याम् (४.१.१३), प्राचां ष्फ तद्धितः (४.१.१७) इत्यादिसूत्राणां नवीनोदाहरणानि। उदाहरणरूपेण— बर्करी, वधूटी, चिरण्टी, पञ्चाध्यायी, पथिकी, शाङ्र्गरवी इत्यादीनां स्त्रीप्रत्ययविन्यासः विशदतया विवृण्वते। अनुसन्धानात्मकोऽयं निबन्धः केवलं व्याकरणशास्त्रस्य सूत्रस्वरूपस्य व्याख्यानं न कृत्वा, तेषां प्रयोगानां यथार्थजीवने प्राचुर्येण दृश्यमानप्रसङ्गानां विवेचनात्मकं उद्घाटनं सम्यग्विधत्ते। अनेन शोधेन स्त्रीप्रत्ययानां प्रयोग-वैचित्र्यं, स्वरूपसंगतिं च अवगम्यते। अतः अयं शोधलेखः सिद्धान्तकौमुद्याः स्त्रीप्रत्ययविधानस्य परिशीलनपूर्वकं नवप्रयोगानां समाहाररूपेण न केवलं शास्त्रीयचिन्तनाय, अपि तु आधुनिकव्याकरणीयविमर्शाय अपि महत्त्वपूर्णं सन्निवेशनं सम्यगुपस्थापयति।

**कूटशब्दाः—** व्याकरणम्, वैयाकरणसिद्धान्तकौमुदी, स्त्रीप्रत्ययप्रकरणम्, नवीनोदाहरणानि, पाणिनिः।

**प्रस्तावना—** संस्कृतभाषायां प्रातिपदिकसंज्ञकानां शब्दानां त्रयः अर्थाः भवन्ति। जातिः व्यक्तिः लिङ्गं चेति। तत्र लिङ्गानि त्रीणि भवन्ति पुंस्त्वम्, स्त्रीत्वम्, नपुंसकत्वं चेति। तत्र किं पुंस्त्वम्, किं स्त्रीत्वम्, किं च नपुंसकत्वम् इति जिज्ञासायां शास्त्रकारैः त्रयाणां लिङ्गानां लक्षणं प्रोच्यते—

**"स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः।**
**उभयोरन्तरं यच्च तदभावे नपुंसकम्" ॥**[1]

अर्थात् स्तनकेशवती स्त्री भवति। लोमवान् पुरुषः भवति। तदभावे स्तनकेशलोमादिव्यञ्जकाभावे सति यद् उभयोः अन्तरं सादृश्यं भवति तन्नपुंसकं भवति इति भावः। एतेन स्तनकेशादिमत्त्वं स्त्रीत्वस्य लक्षणं प्रतिफलति। लोमादिमत्त्वं पुंस्त्वस्य लक्षणं प्रतिफलति। स्तनकेशलोमाद्यभावत्वविशिष्टोभयसदृशत्वं च नपुंसकत्वस्य लक्षणं प्रतिफलति। परन्तु लिङ्गस्य इदं लौकिकं लक्षणं जडपदार्थेषु न सम्भवति। यथा वृक्षादिपदार्थानां न किमपि प्रोक्तं लिङ्गं दृश्यते। यतो हि तत्र लोमादिकं नास्ति। खट्वादिपदार्थानां न किमपि प्रोक्तं लिङ्ग दृश्यते। यतो हि तत्र स्तनकेशादिकं नास्ति। अतः दोषयुक्तमपि इदं लक्षणम् अस्ति। अस्ति। तथाहि सुहृदः पर्यायभूतः मित्रशब्दः नपुंसकलिङ्गः अस्ति अर्थात् नपुंसकलिङ्गविशिष्टार्थस्य वाचकः अस्ति। किन्तु मित्रवाच्यः अर्थः तु बालिका अपि भवितुमर्हति, बालकः अपि भवितुमर्हति। तत्र स्तनकेशादिकमपि भवितुमर्हति लोमादिकमपि भवितुमर्हति।

तत्र लौकिकलक्षणानुसारं मित्रपदार्थस्य स्त्रीत्वमपि प्राप्तं पुंस्त्वमपि प्राप्तम्। किन्तु मित्रशब्दः नित्यनपुंसकलिङ्गविशिष्टस्य अर्थस्य वाचकः अस्ति। अत एव अयं शब्दः नित्यनपुंसकलिङ्गः इति व्यवहारः। तस्माद् एतल्लक्षणानुसारं शास्त्रे लिङ्गस्य व्यवस्था भवितुं नार्हति। अतः लौकिकलिङ्गस्य लक्षणे दोषान् दृष्ट्वा शास्त्रकर्तृभिः लिङ्गस्य शास्त्रीयं लक्षणं कल्पितम् अस्ति। तथाहि सत्त्वम्, रजः, तमः इत्येते त्रयाः गुणाः सन्ति। एते च गुणाः जडे चेतने च तिष्ठन्ति। पुनः प्रत्येकं वस्तुनि तिष्ठन्ति। एवञ्च सत्त्वरजोतमसां प्राकृतगुणानाम् उपचयः पुंस्त्वम्। सत्त्वरजोतमसां प्राकृतगुणानाम् अपचयः स्त्रीत्वम्। सत्त्वरजोतमसां प्राकृतगुणानां स्थितिमात्रं नपुंसकत्वम्। तत्र प्रत्येकं पदार्थे एते त्रयः गुणाः तिष्ठन्ति। पुनः प्रत्येकं पदार्थे एतेषां गुणानाम् उपचयः अपचयः स्थितिमात्रं च भवति। तस्मात् प्रत्येकं पदार्थे त्रीणि लिङ्गानि भवन्ति। परन्तु कः एकलिङ्गकः पदार्थः कः द्विलिङ्गकः कः त्रिलिङ्गकः इत्यत्र कोशादिकमेव प्रमाणम्। यथा तटशब्दः लिङ्गत्रयविशिष्टस्य अर्थस्य वाचकः अस्ति। त्रिषु लिङ्गेषु वर्तते। रामादिशब्दाः नित्यपुंस्त्वविशिष्टस्यार्थस्य वाचकाः सन्ति। अत एव नित्यपुल्लिङ्गाः सन्ति। ज्ञानादिशब्दाः नित्यनपुंसकत्वविशिष्ट-स्यार्थस्य वाचकाः सन्ति। अतः नित्यनपुंसकलिङ्गाः सन्ति। एवमेवान्यत्रापि बोध्यम्। तस्माद् कस्य शब्दस्य किं लिङ्गम् इत्यस्य ज्ञानाय अमरकोशादिग्रन्थाः लिङ्गानुशासनादिकं च पठनीयम्। तेनैव शब्दानां लिङ्गविषये प्रामाणिकं ज्ञानं भवति।

तत्र त्रिषु लिङ्गेषु मध्ये पुंस्त्वबोधनाय नपुंसकत्वबोधनाय च प्रत्ययान्तरम् अपेक्षितं नास्ति। प्रातिपदिकेनैव तेषां प्रतीतिः भवति। किन्तु स्त्रीत्वबोधनाय केचन् प्रत्ययाः कल्पिताः सन्ति। ते च

**टाप्-डाप्-चापस्त्रयोप्येते ङीप् - ङीष् - ङीन्-प्रत्ययैः सह।**
**ऊङ्-तिभ्यां मिलिताश्चापि सन्त्यष्टौ प्रत्ययाः स्त्रियाम् ॥**

एवञ्च टाप् डाप् चाप् ङीप् ङीष् ङीन् ऊङ् ति इत्येते अष्टौ प्रत्ययाः स्त्रीत्वस्य द्योतनाय प्रातिपदिकात् भवन्ति। तत्र कस्माद् प्रातिपदिकात् टाप् भवति कस्मात् वा डाप् भवति इति बोधयितुं प्रकृतं प्रकरणं प्रवर्तते। चतुर्थाध्यायस्य प्रथमपादस्य तृतीयं सूत्रं स्त्र्यधिकारं दर्शयति-

**❋ स्त्रियाम् (४.१.३)**

इदम् अधिकारसूत्रम् अस्ति। अस्य व्याप्तिः **दैवयज्ञिशौ-चिवृक्षिसात्यमुग्रिकाण्ठे-विद्धिभ्योऽन्यतरस्याम्** ४.१.८१ इति सूत्रपर्यन्तं वर्तते। अस्मिन् अधिकारे आहत्य **अष्ट** प्रत्ययाः पाठ्यन्ते। एतेषां सर्वेषां प्रयोगः प्रातिपदिकेभ्यः स्त्रीत्वं द्योतयितुं भवति — इति अस्य अधिकारस्य आशयः। एतेषां प्रत्ययानाम् कोऽपि विशिष्टः अर्थः नास्ति, केवलम् **स्त्रीत्वद्योतनम्** इत्येव एतेषां कार्यम्। यथा, अज **(goat)** इति पुंलिङ्गवाचिनः शब्दात् स्त्रीत्वं द्योतयितुं टाप्-प्रत्यये कृते अजा **(female goat)** इति समानार्थकः परन्तु स्त्रीलिङ्गवाची शब्दः सिद्ध्यति।

अस्मिन् अधिकारे पाठिताः अष्ट प्रत्ययाः **स्त्रीप्रत्ययाः** इति नाम्ना ज्ञायन्ते। एतेषाम् आवली एतादृशी —

१. टाप् — यथा, **अजाद्यतष्टाप्** ४.१.४ इति सूत्रे। अज + टाप् → अजा इति उदाहरणम्।

२. डाप् —यथा, **डाबुभाभ्यामन्यतरस्याम्** ४.१.१३ इति सूत्रे। सीमन् + डाप् → सीमा इति उदाहरणम्।

३. चाप् — यथा, **यङश्चाप्** ४.१.७४ इति सूत्रे। कौसल्य + चाप् → कौसल्या इति उदाहरणम्।

४. ङीप् — यथा, **ऋन्नेभ्यो ङीप्** ४.१.५ इति सूत्रे। कर्तृ + ङीप् → कर्त्री इति उदाहरणम्।

५. ङीष् — यथा, **अन्यतो ङीष्** ४.१.४० इति सूत्रे। सारङ्ग + ङीष् → सारङ्गी इति उदाहरणम्।

६. ङीन् — यथा, **शार्ङ्गरवाद्यञो ङीन्** ४.१.७३ इति सूत्रे। शार्ङ्गरव + ङीन् → शार्ङ्गरवी इति उदाहरणम्।

७. ऊङ् —यथा, **ऊङुतः** ४.१.६६ इति सूत्रे। कुरु + ऊङ् → कुरू इति उदाहरणम्।

८. ति — यथा, **यूनस्तिः** ४.१.७७ इति सूत्रे। अयं प्रत्ययः तद्धितसंज्ञकः अपि अस्ति। युवन् + ति → युवति इति उदाहरणम्।

**❋ अवधेयम्— प्राचां ष्फ तद्धितः** ४.१.१७ इति सूत्रे **'ष्फ'** प्रत्ययः तद्धितसंज्ञकः अपि अस्ति। अस्मात् प्रत्ययान्तात् स्त्रीत्वे नित्यं ङीष् इति स्त्रीप्रत्ययः अपि विधीयते। गार्ग्य + ष्फ + **ङीष्** → गार्ग्यायणी इति उदाहरणम्।

अपि च, अस्मिन् अधिकारे **अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे** ४.१.७८ इति सूत्रेण ष्यङ् इति कश्चन आदेशः अपि पाठितः अस्ति। अयम् आदेशः विशिष्टेभ्यः शब्देभ्यः विहितस्य तद्धितप्रत्ययस्य स्थाने भवति।

भगवता पाणिनिना अजाद्यतष्टाप् (४।१।४) सूत्रतः दैवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्ठेविद्धिभ्योऽन्यतरस्याम् (४।१।८१) यावत् सूत्रेषु स्त्रीप्रत्ययानाम् आलोचना विस्तारेण कृता ।

परन्तु प्रबन्धेऽस्मिन् वैयाकरणसिद्धान्तकौमुदीं विहाय अन्येषु ग्रन्थेषु शास्त्रान्तरेषु च स्त्रीप्रत्ययानां कानिचन नवीनोदाहरणानि संक्षेपेण यथामति प्रस्तूयते।

**टाप्-प्रत्ययः**

**❋ अजाद्यतष्टाप् (४.१.४)**

ह्रस्व-अकारान्तशब्देभ्यः, अजादिगणस्य च शब्देभ्यः स्त्रीत्वं द्योतयितुं टाप्-प्रत्ययः भवति। यथा,-

मेध +टाप्=मेध+आ = मेधा।
गङ्ग +टाप्=गङ्ग+ आ = गङ्गा।
सर्व +टाप्= सर्व + आ = सर्वा।
खट्व + टाप् = खट्व - + आ = खट्वा।
धनिक+टाप् = धनिक + आ = धनिका।
कृत्रिम + टाप् = कृत्रिम + आ = कृत्रिमा।
स्वभावज + टाप्=स्वभावज + आ = स्वभावजा।
गत +टाप्=गत + आ = गता ।

**ङीप्-प्रत्ययः**

**❋ ऋन्नेभ्यो ङीप् (४.१.५)**

ऋकारान्तप्रातिपदिकात्, नकारान्तप्रातिपदिकात् च स्त्रीत्वम् द्योतयितुं ङीप्-प्रत्ययः भवति। क्रमेण उदाहरणानि एतानि —

**ऋदन्तः प्रातिपदिकात्**

हर्तृ + ङीप् = हर्तृ + ई = हर्त् र् + ई = हर्त्री[2]

"कुमाराः कृतसंस्कारास्ते **धात्री**स्तनपायिनः ।[3]

धातृ + ङीप् = धातृ + ई = धात्री

**नकारान्तः प्रातिपदिकात्**

योगिन् + ङीप् = योगिन् + ई = योगिनी

रोगिन् + ङीप् = रोगिन् + ई = रोगिणी

"तयोर्जगृहतुः पादान् राजा **राज्ञी** च मागधी ।[4]

राजन् + ङीप् = राजन् + ई = राज्-न् + ई = राज्.ञ् + ई = राज्ञी (राणी)

**❋ उगितश्च (४.१.६)**

उगिदन्तात् प्रातिपदिकात् स्त्रीत्वं द्योतयितुं ङीप्-प्रत्ययः भवति अर्थात् यस्य प्रातिपदिकस्य अन्ते उक्-प्रत्याहारस्य वर्णः विद्यते, तस्मात् प्रातिपदिकात् स्त्रीत्वं द्योतयितुं ङीप्-प्रत्ययः भवति।

उदाहरणानि— **विदुषी—** "चिकुरप्रकरा जयन्ति ते **विदुषी** मूर्द्धनि सा विभर्त्ति यान्॥"[6]

एवमेव नमन्ती, पठन्ती, यजन्ती, पतन्ती, चोरयन्ती इत्यादयः।

**❋ वयसि प्रथमे (४.१.२०)**

कुमारावस्थायाः निर्देशार्थम् ह्रस्व-अकारान्तात् प्रातिपदिकात् ङीप्-प्रत्ययः भवति। शरीरस्य भिन्नाभ्यः अवस्थाभ्यः कुमार-अवस्थायाः निर्देशार्थं प्रयुक्तात् प्रातिपदिकात् ह्रस्व-अकारान्तात् ङीप्-प्रत्ययः भवति- इति अस्य सूत्रस्य अर्थः। सामान्यरूपेण शरीरस्य तिस्रः अवस्थाः परिगण्यन्ते — कुमारावस्था (कौमारम्, **young age)**, युवावस्था (यौवनम्, **adult age)**, तथा च वृद्धावस्था (जरा / वार्धक्यम्, **old age)**। एतासां तिसृणाम् अपि अवस्थानां निर्देशार्थं भिन्नाः शब्दाः प्रयुज्यन्ते। एतासु कुमारावस्थायाः निर्देशार्थं प्रयुक्तेभ्यः अदन्तेभ्यः प्रातिपदिकेभ्यः स्त्रीत्वे प्रकृतसूत्रेण ङीप्-प्रत्ययः भवति। यथा —

१. कुमार + ङीप् → कुमारी।

२. किशोर + ङीप् → किशोरी।

३. बर्कर (शिशुः इत्यर्थः) + ङीप् → बर्करी।

एते त्रयः अपि शब्दाः कुमारावस्थां निर्दिशन्ति, अतः एतेभ्यः स्त्रीत्वे विवक्षिते ङीप्-प्रत्ययः विधीयते।

४. वधूट / बधूट + ङीप् → वधूटी / बधूटी (अल्पवयस्का बधूः।) यथा शास्त्रे—

"नूतनजलधररुचये गोप'**बधूटी**'दुकूलचौराय ।

तस्मै नमः कृष्णाय संसारमहीरुहस्य बीजाय ॥[6]" इति

५.चिरण्ट + ङीप् → चिरण्टी। (चिरात् चिरेण वा अटति पितृगृहादिति। )

**❋ द्विगोः (४.१.२१)**

संख्यापूर्वो द्विगुः (२.१.५२) इति सूत्रेण निर्दिष्टः यः द्विगुसमासः, तेन निर्मितात् ह्रस्व-अकारान्त-प्रातिपदिकात् स्त्रीत्वं द्योतयितुं ङीप्-प्रत्ययः विधीयते — इति अस्य सूत्रस्य अर्थः। प्रकृतसूत्रेण निर्दिष्टः द्विगुसमासः त्रिप्रकारकः वर्तते — तद्धितार्थः द्विगुः, उत्तरपदद्विगुः, समाहारद्विगुः। एतेषाम् विषये विवरणम्, उदाहरणानि च अधः क्रमेण दत्तानि सन्ति —

**तद्धितार्थः द्विगुः—**

१. पञ्च पात्राणि अवहरति= पञ्चपात्रिकी

२. द्वौ आढकौ पचति सा = द्व्याढकी

**समाहारद्विगुः—**

२. पञ्चानाम् अजानां समाहारः = पञ्चन् + अज + ङीप् → पञ्चाजी

२. अष्टानाम् अध्यायानां समाहारः = अष्टन् + अध्याय + ङीप् → अष्टाध्यायी

३. त्रयाणां पादानां समाहारः = त्रि + पाद + ङीप् → त्रिपादी

४. पञ्चानां खट्वानां समाहारः = पञ्चन् + खट्वा + ङीप् → पञ्चखट्वी।

**उत्तरपदद्विगुः—**

१. पञ्च गावः धनम् अस्य = पञ्चगावधना

**डाप्-प्रत्ययः**

**❋ डाबुभ्यामन्यतरस्याम् (४.१.१३)**

मन्नन्तेभ्यः प्रातिपदिकेभ्यः, तथा च अन्नन्तेभ्यः बहुव्रीहिसमस्त-पदेभ्यः प्रातिपदिकेभ्यः स्त्रीत्वं द्योतयितुं विकल्पेन डाप्-प्रत्ययः भवति। यस्य प्रातिपदिकस्य अन्ते मन् इति विद्यते तस्मात् प्रातिपदिकात्, तथा च यस्य बहुव्रीहिसमस्तपदस्य अन्ते अन् इति विद्यते तस्मात् प्रातिपदिकात् द्योतयितुं डाप् इति स्त्रीप्रत्ययः विकल्पेन भवति। क्रमेण उदाहरणानि एतानि —

**मन्नन्तानि—**पामा[7], सीमा, निर्गरिमा

**अन्नन्तानि—**चारुपर्वा, बहुराजा[8]

**ष्फप्रत्ययः**

**❋ प्राचां ष्फ तद्धितेः (४.१.१७)**

यञ्-प्रत्ययान्त-प्रातिपदिकात् स्त्रीत्वं द्योतयितुं प्राचाम् (पूर्वदिशि विद्यमानानाम्) आचार्याणाम् मतेन तद्धितसंज्ञकः ष्फ-प्रत्ययः भवति — इति अस्य सूत्रस्य आशयः। उदाहरणानि—दक्षस्य गोत्रापत्यं स्त्री = दाक्षी[9]।, गर्गस्य गोत्रापत्यं स्त्री = गार्ग्यायणी[10]। एवमेव, वत्सस्य गोत्रापत्यं स्त्री = वात्स्यायनी[11]।

**ङीष्-प्रत्ययः**

**❋ षिद्गौरादिभ्यश्च (४.१.४१)**

येषु प्रातिपदिकेषु षकारः इत्संज्ञकः अस्ति तेभ्यः प्रातिपदिकेभ्यः, तथा च गौरादिगणे पाठितेभ्यः प्रातिपदिकेभ्यः स्त्रीत्वं द्योतयितुं 'ङीष्' इति प्रत्ययः विधीयते — इति अस्य सूत्रस्य अर्थः। क्रमेण विवरणम् एतादृशम् —

१. पथिन् इत्यस्मात् शब्दात् **पथः ष्कन्** (५.१.७५) इति सूत्रेण ष्कन्-प्रत्यये कृते पथिक इति शब्दः सिद्ध्यति। एतादृशः प्राप्तः पथिक इति शब्दः षित्-प्रत्ययान्तः अस्ति अतः अस्मात् स्त्रीत्वं द्योतयितुं प्रकृतसूत्रेण ङीष्-प्रत्यये कृते **पथिकी** इति शब्दः सिद्ध्यति। एवमेव खनकी[12], रजकी[13], आमलकी[14], गौरी[15], पृथिवी इत्यादयः।

**ऊङ्-प्रत्ययः**

**❋ ऊङुतः (४.१.६६)**

उकारान्तात् अयोपधात् मनुस्यजातिवाचिनः प्रातिपदिकात् स्त्रियाम् ऊङ् प्रत्ययो भवति। उदाहरणम्- ब्रह्मबन्धूः, वीरबन्धूः, धीबन्धूः[16] इत्यादिः।

**ङीन्-प्रत्ययः**

**❋ शाङ्गर्रवाद्यञो ङीन् (४.१.७३)**

जातिवाचकात् अनुपसर्जनात् शाङ्गर्रवादिगणपठितात् अदन्तात् प्रातिपदिकात् स्त्रीत्वे द्योत्ये ङीन् प्रत्ययः परः भवति। उदाहरणम्— गौतमी[17], पुत्री, बैदी, चण्डाली[18] इत्यादिः।

**चाप्-प्रत्ययः**

**❋ यङश्चाप् (४.१.७४)**

यङन्तात् स्त्रियां चाप् स्यात्। यङ इति ञ्यङ्ष्यङोः सामान्यग्रहणम् अर्थात् अत्र यङः इत्यनेन ञ्यङः ष्यङः च ग्रहणमस्ति। ञ्यङः ष्यङः च प्रत्ययौ इति कृत्वा अत्र प्रत्ययग्रहणे तदन्ताः ग्राह्याः इति नियमेन तदन्तविधिः भवति। तेन यङः इत्यनेन ञ्यन्तात् ष्यङन्तात् च इत्यर्थः भवति। अतः ञ्यङन्तात् प्रातिपदिकात्, ष्यङन्तात् प्रातिपदिकात् च त्रीत्वे द्योत्ये चाप् प्रत्ययः परः भवति।

उदाहरणम्— कौसल्या, वाराह्या, बालाक्या इत्यादिः।

**उपसंहारः—**

स्त्रीत्वबोधनाय वैयाकरणसिद्धान्तकौमुद्याम् स्त्रीप्रत्ययप्रकरणे अष्ट प्रत्ययाः कल्पिताः सन्ति। ते च टाप् डाप् चाप् ङीप् ङीष् ङीन् ऊङ् ति इति । एतेषां स्त्रीप्रत्ययानां सिद्धान्तकौमुदीबहिर्भूतानि कानिचन नवीनोदाहरणानि संक्षेपेण यथामति प्रस्तुतानि। यद्यपि स्त्रीप्रत्ययविधायकानि बहूनि सूत्राणि अष्टाध्याय्यां सन्ति तथापि प्रबन्धेऽस्मिन् स्थालीपुलाकन्यायेन केषाञ्चन विशिष्टसूत्राणाम् आलोचनं विहितानि मया। शास्त्रेषु लोकव्यावहारेषु च इतोऽपि बहूनि प्रयोगानि भवन्ति । तद्विषये अस्माकम् अवधानं दातव्यम् । अतः भाषाविज्ञानस्य, शब्दरूपविकासस्य, च स्त्रीत्वप्रत्ययविन्यासस्य गवेषणायाम् प्रबन्धोऽयं नव्यं सन्देशं वहति। भविष्येऽपि एतेषां प्रत्ययानां विशिष्टवर्गेषु वर्तमानविनियोगः, तेषां सामाजिक-भाषावैज्ञानिकपरिणामश्च विशेषेण गवेषणीयः।

**❋ सन्दर्भग्रन्थपञ्जी ❋**


1. *अमरकोषः* । व्याख्याकारः ब्रह्मानन्दः त्रिपाठी । वाराणसी ; चौखम्बासुरभारतीप्रकाशनम्, २०१५ ।
2. *अष्टाध्यायी*। सम्पादको गोपालदत्तपाण्डेयः । वाराणसी ; चौखम्बासुरभारतीप्रकाशनम्, २००९ ।
3. *कौटिलीयम् अर्थशास्त्रम्* । सम्पादकः वाचस्पतिगैराला। वाराणसी ; चौखम्बाविद्याभवनम् , तृतीयसंस्करणम् १९८४ ।
4. नैषधीयचरितम् । सम्पादकः शेषराजशर्मा रेग्मी । वाराणसी ; चौखम्बासुरभारतीप्रकाशनम्, १९९५ ।
5. *पस्पशाह्निकम्* । टीकाकारः सम्पादकश्च डाँ. शशीभूषणमिश्रः । कोलकाता ; वि.एन्. पावलिकेशान्, २०१८ ।
6. *पाणिनीयव्याकरणोदाहरणकोशः* । (प्रथमभागः) । सम्पादकाः एफ्. ग्रिमल, वि. वेङ्कटराजशर्मा प्रभृतयः । तिरुपतिः ; राष्ट्रियसंस्कृतविद्यापीठम्, २००६ ।
7. *पाणिनीयाष्टाध्यायीसूत्रवृत्तिः काशिका* (चतुर्थभागः) । सम्पादकौ जयशङ्करलालत्रिपाठी सुधाकरमालवीयश्च। प्राच्यभारतीय-ग्रन्थमाला—२७ । वाराणसी ; तारा प्रिंटिंग वर्क्स, १०८५ ।
8. *भाषावृत्तिः* । सम्पादकः स्वामी द्वारिकादासशास्त्री । वाराणसी ; तारा पाब्लिकेशन्स , १९७१ ।
9. *रघुवंशमहाकाव्यम्* (प्रथमभागः) । व्याख्याकारः शिवरामभट्टः। तिरुपती ; राष्ट्रियसंस्कृतविद्यापीठम्, २०१९ ।
10. *लघुसिद्धान्तकौमुदी भैमीव्याख्या* (षष्ठभागः)। सम्पादकः भीमसेनशास्त्री। दिल्ली ; भैमीप्रकाशनम् , २०१९ (सप्तमं पुनर्मुद्रणम्, प्रथमसंस्करणम् १९८९) ।
11. *वैयाकरणसिद्धान्तकौमुदी (बालमनोरमातत्त्वोबोधिनीसहिता)* (प्रथमभागः) । सम्पादकौ गिरिधरः शर्मा, श्रीपरमेश्वरानन्दः शर्मा । दिल्ली ; मोतिलाल बाराणसीदासः, १९६१ ।
12. *वैयाकरणसिद्धान्तकौमुदी मूलमात्रम्*। सम्पादकः श्रीगोविन्दा-चार्यः। वाराणसी ; चौखम्बासुरभारतीप्रकाशनम् , नूतन-संस्करणम् २०२३ ।
13. *वैयाकरणसिद्धान्तकौमुदी श्रीधरमुखोल्लासिनी हिन्दीव्याख्या-समन्विता* (द्वितीयभागः)। व्याख्याकारः श्री गोविन्दाचार्यः, सम्पादिका लक्ष्मी शर्मा। वाराणसी ; चौखम्बासुरभारती-प्रकाशनम् , २०१६ ।


**पाद टिप्पणी:**

1. स्त्रियाम् (४.१.३) इति सूत्रे भाष्ये।
2. काशिकायाम् (६.१.१७४)
3. रघुवंशे (१०.७८)
4. रघुवंशे (१.५७)
5. नैषधचरिते (२.२०)
6. भाषापरिच्छेदस्य मङ्गलाचरणे
7. अमरकोशे (२.६.५३)
8. काशिकायाम् (४.१.१३)
9. तत्रैव (४.१.१७)
10. तत्रैव (४.१.१७)
11. तत्रैव (४.१.१७)
12. भाषावृत्त्याम् (४.१.४१)
13. तत्रैव (४.१.४१)
14. तत्रैव (४.१.४१)
15. तत्रैव (४.१.४१)
16. तत्रैव (४.१.६६)
17. अभिज्ञानशाकुन्तलस्य चतुर्थोऽङ्के
18. अर्थशास्त्रे (१४.३.६२)